**2017**

**M. A. Part–II**

**SANSKRIT**

**PAPER–VI**

*Full Marks* : 100

*Time* : 4 Hours

***The figures in the right hand margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.***

## First Half – 50 Marks

1. किं तावत् कारणलक्षणम्? तत् कतिविधम्? कानि च तानि? सोदाहरणं प्रत्येकं प्रकारः आलोच्यताम्? 2+1+1+9

अथवा

किं तावत् प्रत्यक्षप्रमाणस्य लक्षणम्? तत्र लक्षणघटके पदे कीदृशः समासः स्वीकार्यः? तत् प्रत्यक्षं कितिविधम्? बौद्धैः कीदृशं प्रत्यक्षं न स्वीकृतं कथं वा? तत्र नैयायिकानां का युक्तिः संक्षेपतः आलोच्यताम्। 2+2+1+1+2+5

2. कस्यचिदेकस्य टीका लेख्या — 6

उपमानम्, परार्थानुमानम्, सन्निकर्षः ।

3. अधोलिखितेषु यथेच्छं प्रश्नत्रयं देवनागरलिप्या संस्कृतभाषया च पूर्णवाक्येन समाधेयम् । 2×3

a) सोदाहरणं लक्षणलक्षणं निरूपयत ।

b) किं तावत् शब्दप्रमाणलक्षणम्?

c) के तावत् अयुतसिद्धपदार्थाः?

d) प्रमालक्षणं किम्? तत्र लक्षणघटकपदानां किं तात्पर्यम्?

e) लिङ्गपरामर्श इत्यस्य कोऽर्थः?

4. सांख्यकारिकानुसारं सत्कार्यवादः संस्थापनीयः । 13

अथवा

सांख्यसम्मता सृष्टिप्रक्रिया यथाग्रन्थम् आलोच्यताम् ।

5. सप्रसङ्गं व्याख्यायताम् — 6

'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः' ।

अथवा

पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्यया च्चैव ।

6. अधोलिखितेषु यथेच्छं प्रश्नत्रयं देवनागरलिप्या संस्कृतभाषया च पूर्णवाक्येन समाधेयम् । 2×3

a) सांख्यमते दृष्टप्रमाणलक्षणं किम् ?





b) आधिभौतिकं दुःखं किम् ?

c) सांख्यमते रजोगुणस्य लक्षणं किम् ?

d) वस्तुनोऽनुपलब्धौ कारणं किम् ?

e) सांख्यशब्दस्य व्युत्पत्तिलभ्यार्थं निरूपयत ।

## Second Half [Marks-50]

1. अधोलिखितेषु द्वयोरुत्तरं देयम् — 10×2

क) अज्ञानस्य स्वरूपं विशदमालोचनीयम् ।

ख) किं नाम पञ्चीकरणम्? तस्य स्वीकारे का युक्तिः? सर्व विशदं व्याख्येयम् ।

ग) विवर्त्तपरिणामयोः स्वरूपं सोदाहरणं विवेचनीयम् ।

घ) आत्मनः स्वरूपविषये विविधान् वादान् समुल्लिख्य सिद्धान्तः सयुक्तिकं समुपस्थापनीयः ।

2. अधोलिखितेषु एकस्य व्याख्या कार्या — 5

क) वेदान्तस्वरूपम् ।

ख) कोषपञ्चकम् ।

ग) समाधिद्वयम् ।

घ) अर्थवादः ।

3. अधोलिखितेषु एकः प्रश्नः समाधेयः — 12

क) अथ शब्दानुशासनमिति वाक्यस्य तात्पर्यं विशदीकरणीयम् ।

ख) किं पुनराकृतिः पदार्थः, आहोस्विद् द्रव्यम्—अत्र सिद्धान्तः सयुक्तिकं प्रतिपादनीयः ।

ग) सिद्धे शब्दार्थसम्बन्धे इति वार्त्तिकस्य आशयो निरूपणीयः ।

4. अधोलिखितेषु एकस्य तात्पर्यं विशद्यताम् – 7

क) अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः ।

ख) किं पुनर्नित्यः शब्द आहोस्वित् कार्यः ?

ग) अथ वा पुनरस्तु सूत्रम् ।

5. अधोलिखितेषु एकस्य व्याख्या कार्या – 6

क) अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम् ।

ख) अथ वा कूपखानकवदेतद् भविष्यति ।

ग) व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् ।

—०—